## कालाः । (२८/६९०)

द्वितीया क्तेन इति वर्तते । कालवाचिनः शब्दाः द्वितीयान्ताः क्तान्तेन सह समस्यन्ते [1]विभाषा, तत्पुरुषश्च समासो भवति । अनत्यन्तसंयोगार्थं वचनम् । कालाः इति न स्वरूपविधिः । षण्मुहूर्ताश्चराचराः, [2]ते कदाचित् अहर्गच्छन्ति कदाचित् रात्रिम् (म.भा. १.३८४) । अहरतिसृता मुहूर्ताः अहःसङ्क्रान्ताः । [3]रात्र्यतिसृता मुहूर्ताः रात्रिसङ्क्रान्ताः । मासप्रमितश्चन्द्रमाः । मासं प्रमातुमारब्धः[4] [5]प्रतिपच्चन्द्रमाः [6]इत्यर्थः ॥

## अत्यन्तसंयोगे च । (२९/६९१)

कालाः इति वर्तते । क्तेन इति निवृत्तम् । अत्यन्तसंयोगः कृत्स्नसंयोगः, कालस्य स्वेन सम्बन्धिना व्याप्तिः[7] । कालवाचिनः शब्दा द्वितीयान्ता अत्यन्तसंयोगे गम्यमाने सुपा सह समस्यन्ते [8]विभाषा, तत्पुरुषश्च समासो भवति । मुहूर्तं सुखम् मुहूर्तसुखम् । [9]सर्वरात्रकल्याणी । [10]सर्वरात्रशोभना ॥

## तृतीया तत्कृतार्थेन गुणवचनेन । (३०/६९२)

सुप् सुपा इति वर्तते । तस्य विशेषणमेतत् । तृतीयान्तं गुणवचनेन अर्थशब्देन च सह समस्यते, तत्पुरुषश्च समासो भवति । कीदृशेन गुणवचनेन? तत्कृतेन [11]तदर्थकृतेन, [12]तृतीयान्तार्थकृतेन इति यावत् । शङ्कुलया खण्डः शङ्कुलाखण्डः । [13]किरिणा काणः किरिकाणः । अर्थशब्देन--धान्येनार्थः धान्यार्थः[14] । तत्कृतेन इति किम्? अक्ष्णा काणः । गुणवचनेन इति किम्? गोभिर्वपावान् (म.भा. १.३८५) ॥

## पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः । (३१/६९३)

[15]पूर्व सदृश सम ऊनार्थ कलह निपुण मिश्र श्लक्ष्ण इत्येतैः सह तृतीयान्तं समस्यते, तत्पुरुषश्च समासो भवति । [16]अस्मादेव वचनात् [17]पूर्वादिभिर्योगे तृतीया[18] भवति, हेतौ वा द्रष्टव्या । पूर्व--मासेन पूर्वः मासपूर्वः । [19]संवत्सरपूर्वः । सदृश--मातृसदृशः । पितृसदृशः । सम--मातृसमः । ऊनार्थ--[20]माषोनम् । कार्षापणोनम् । माषविकलम् । कार्षापणविकलम् । कलह---[21]असिकलहः । वाक्कलहः । निपुण--[22]वाङ्निपुणः । आचारनिपुणः । मिश्र---[23]गुडमिश्रः । तिलमिश्रः । श्लक्ष्ण---[24]आचारश्लक्ष्णः ।

[७६] पूर्वादिष्ववरस्योपसङ्ख्यानम् । (म.भा. १.३८५)

मासेनावरः मासावरः । संवत्सरावरः ॥

---

1. विभाषा नास्ति ब.फ.ह्. 2. ते नास्ति फ. 3. रात्र्यारूढाः ब.ड.फ. 4. मासप्रमितः इत्यधिकम् ड.फ. 5. प्रतिपच्चन्द्रः ह्. 6. इत्यर्थः नास्ति ब.फ. 7. अत्यन्तसंयोगः इत्यधिकम् क.ह्. 8. विभाषा नास्ति ब.क.इ.फ. 9. सर्वरात्रं कल्याणी इत्यधिकम् क, नास्ति फ. 10. सर्वरात्रशोभनी ब. 11. तदर्थकृतेन नास्ति इ.फ.ह्. 12. तृतीयान्तकृतेन क.ड.इ.ह्. 13. उदाहरणमिदं नास्ति फ. 14. हिरण्यार्थः इत्यधिकम् क.फ.ह्, अर्थशब्दः प्रयोजनवाची । हिरण्यार्थः इत्यधिकम् ड. 15. सुप्सुपेति वर्तते इत्यधिकम् ड. 16. तस्मादेव ह्. 17. पूर्वादियोगतृतीया इ. 18. °विभक्ति ड. 19. उदाहरणमिदं नास्ति फ. 20. माषेण ऊनम् कार्षापणेन ऊनं माषेण विकलम् इत्यधिकम् क. 21. असिना कलहः क. 22. वाचा निपुणः क, वाग्निपुणः ड, प्रज्ञानिपुणः इत्यधिकम् ड. 23. गुडेन मिश्रः क, तण्डुलमिश्रः इत्यधिकम् ह्. 24. आचारेण श्लक्ष्णः, विद्याश्लक्ष्णः इत्यधिकम् क, वाक्श्लक्ष्णः ड.फ.ह्.